No. १३३४

Title क्त्वा वादः

Author ×

Extent ३ Age ×

Subject न्याय वैशेषिकं

अथ क्त्वावादः तत्र क्त्वाप्रत्ययस्य वाच्यवा प्रागभावे शक्तिः कर्त्तरि निरूढलक्षणा प्रागभावः कालीनत्वसंबंधेन आ[illegible]गमासंबंधेन [illegible]
कृत्यर्थस्य विशेष्यतया प्रतियोगितासंबंधेनोत्तरक्रियायामश्च विशेषणतयान्वेति। कर्त्ता चोत्तरक्रियायां कर्तृ[illegible] न विशेष्यता[illegible]
याऽन्वेति प्रकृत्यर्थश्च पक्षे त्यादाविव तदेकदेशे कर्तृत्वे विशेषणतयाऽन्वेति। इत्थं च भुक्त्वा व्रजति चैत्र [illegible] दौ भोजन[illegible]
र्तृकं यद्भोजनकालीनप्रागभावप्रतियोगिभोजनवृत्तिप्रागभावप्रतियोगिवागमनं तदनुकूलकृतिमांश्चैत्र इत्यन्वयः। भोजन
तरत्वानुकर्त्रादिनाव्यवधान इव वर्षादिनाव्यवधानेपि भुक्त्वा व्रजतीति प्रयोगस्य इष्टत्वात्। कर्तृत्वं च कृतिमत्त्वं क्वचिदाश्रयत्व
व्यापारवत्त्वं च। एवं कर्तृकर्तृत्वमपि तन्निष्ठकृतिजन्यत्वम्। क्वचिच्च तदाश्रितत्वं तन्निष्ठव्यापारजन्यत्वं च तेन रथः स्थि[illegible]गाकृ[illegible]
काष्ठमोदनं पक्त्वा तेमनं पचतीत्यादावचेतनेपि नान्वयानुपपत्तिः। स्थित्याश्रयाश्रितं यत्स्थितिकालीनप्रागभावप्रति[illegible]गि
गमनं तदाश्रययोरर्थः। ओदनकर्मकपाकानुकूलव्यापारवन्निष्ठव्यापारजन्यं यदोदनकर्मकपाककालीनप्रागभावप्रतियोगिप
तियोगितेतत्कर्मकपचनं तदनुकूलव्यापारवत्त्वा[illegible]नित्यत्वयसंभवात्। न चैवं स्वीयभोजनपूर्ववर्त्तिपुरुषांतरीयभोजनोत्तरवर्त्ति

गा०

गमनेपि भुक्त्वा व्रजतीति प्रयोगापत्तिरिति वाच्यम्। क्त्वाप्रत्ययार्थयोः कर्तृप्रागभावयोर्विशेष्यतया प्रकृत्यर्थतावच्छेदकरूपेणैक
क्रियाव्यक्त्यन्वयित्वस्य व्युत्पत्तिसिद्धत्वात्। अत एव कर्तृप्रागभावयोरुभयोः पृथगर्थत्वे भोजनसमानकालीनगमनेपि केवलक
र्तृकर्तृत्वांशमादाय तादृशप्रयोगापत्तिः एवं केवलतत्कालीनप्रागभावप्रतियोगित्वरूपोत्तरवर्त्तित्वांशमादाय भिन्नकर्तृकभोज
नोत्तरवर्त्तिगमनेपि तादृशप्रयोगापत्तिश्चेति निरस्तम्। प्रकृत्यर्थतावच्छेदकरूपेणैकक्रियाव्यक्त्यन्विततदुभयविषयकबोधे ए
व तत्तत्पदसमभिव्याहृतक्त्वाप्रत्ययस्य समर्थत्वात्। न च तदुभयविषयकबोध एव क्त्वाप्रत्ययस्य निरूढत्वे मुखं व्यादाय स्वपिति
त्यनन्वयापत्तिः। ओष्ठपुटविभागरूपस्य मुखव्यादानस्य स्वापोत्तरकालीनतया स्वापे तत्कालीनप्रागभावप्रतियोगित्वस्य बाध
इति वाच्यम्। मुखव्यादानानन्तरं स्वापे यत्किंचित्स्वापव्यक्तेरुत्पादादेव तत्रान्वयसंभवात्। न च तथापि त्वमवजानासि मां यस्मात्तस्मात्
तेन भविष्यति। मन्त्प्रसूतिमनाराध्य प्रजेति त्वांशशापसाइत्यादौ भिन्नकर्तृकेपि क्त्वादर्शनात् कथं तदुभयविषयकबोधे क्त्वाप्रत्य
यस्य निरूढत्वं यस्मात्त्वं मामवजानासि तस्मान्मत्प्रसूतिमनाराध्य प्रजा न भविष्यतीति सुरभिस्त्वां शशापेति तदर्थादिति वा...

तत्रानाराध्येत्यनंतरं स्थिरस्येत्यध्याहृत्य समानकर्तृकत्वोपपादनम्। अनाराध्येत्यत्र निनिवप्रत्ययेन समानकर्तृत्वसंभवाच्च
न च तथापि यत्रांगुलीसंयुक्तपटेंगुलीसंयोगनाशानंतरं घटसंयोगस्तत्रापि घटेंगुल्यां संयुज्य पटे स्थित इति प्रयोगापत्तिः। घटपटसंयो
गस्य घटपटोभयकर्तृकतया अंगुलीसंयोगसमानकर्तृत्वस्य तत्र सत्त्वादिति वाच्यम्। अत्र युजस्थाधातुद्वयस्य तदुभयघटव्य
क्तिप्रतियोगिकसंयोगत्वस्वरूपेण लक्षणया एकघटव्यक्तिकर्तृकसंयोगादेवोक्तस्थले तादृशव्यवहाराभावात्० इत्थं चांगुलीनिष्ठत
द्घटव्यक्तिप्रतियोगिकसंयोगकर्तृकोयांगुलीनिष्ठतद्घटव्यक्तिप्रतियोगिकसंयोगवृत्तिप्रागभावप्रतियोगितद्घटव्यक्तिप्रतियो
गिकपटवृत्तिसंयोगस्तदाश्रयो घटस्त्यन्वयः। एतेन यत्रैकत्रौदनं पक्त्वा ओदनांतरं भुज्यते तत्रोपोदनः पक्त्वा भुज्यते इति प्रयोगा
पत्तिः। न चेष्टापत्तिः तत्र ओदनं पक्त्वा भुज्यत इत्येव प्रयोगनियमादित्यपि निरस्तम्। कर्मप्रत्ययस्थले धातुद्वयस्य तद्घटि कर्म
कत्वविशिष्टस्वार्थतावच्छेदकरूपेण लक्षणया एकव्यक्तिकर्मकक्रियान्वयबोधकत्वनियमादेवोक्तस्थले तादृशव्यवहाराभाव
त्० इत्थं च तदोदनव्यक्तिकर्मककर्मकपाककर्तृकं यत्तदोदनव्यक्तिकर्मकपाककर्तृकप्रागभावप्रतियोगितदोदनव्यक्तिकर्मकभो

क्त्वो

जनं तत्कर्मतावान्नोदनइत्यन्वयः। ननु तथापि प्रागभावानभ्युपगमे क्त्वाप्रत्ययस्य कुत्र शक्तिः॰ न च तदा ध्वंस एव शक्तिस्तस्य
स्वाधिकरणक्षणोत्पत्तिकत्वरूपस्वसमानकालोत्पन्नत्वसंबंधेन समभिव्याहृतक्रियायामन्वयः प्रत्ययार्थप्रतियोगि
३ तासंबंधेन प्राक्पश्चाच्चैत्रो भुक्त्वा व्रजतीत्यादौ भोजनसमानकर्तृकं यद्भोजनध्वंससमानकालोत्पन्नगमनं तदनुकूल
कृतिमांश्चैत्र इत्याद्यन्वय इति वाच्यम्। स्थित्वा पश्यति स्थित्वा भुंक्ते इत्याद्यन्वयबोधासंभवात् दर्शनभोजनानंतरमपि स्थि
तेः सत्त्वादिति चेत् तर्हि क्त्वाप्रत्ययस्य पूर्वकाल एव शक्तिः सामान्यतः कालत्वं शक्यतावच्छेदकं न तु पूर्वकालत्वं तस्य चानंतर्य
संबंधेन समभिव्याहृतक्रियायामन्वयः। आनंतर्यं च स्वध्वंसाधिकरणक्षणोत्पत्तिकत्वं प्रकृत्यर्थध्वंसकालेऽधिकरणतासंबं
धेन विशेषणतया ऽन्वेति॰ अत एव चैत्रो भुक्त्वा व्रजतीत्यत्र भोजनसमानकर्तृकं यद्भोजनाधिकरणकालानंतरगमनं तदनु
कूलकृतिमानित्यन्वयः। अत एव एककर्तृकयोः पूर्वकाले क्त्वा इत्यनुशासनमपि सांगुसंगच्छते वस्तुतस्तु क्त्वाप्रत्ययस्य कृता
२ वेव शक्तिः प्रागभावत्वादिकमपेक्ष्य जातित्वेन कृतित्वस्य लघुत्वात् स्वाश्रयकर्तृकत्वात्मकपरंपरासंबंधेन समभिव्याहृतक्रिया

यां तदन्वयः प्रागभावपूर्वकाले वा निरूढलक्षणा चैत्रो भुक्त्वा व्रजतीत्यत्र भोजनानुकूलकृत्याश्रयकर्तृकं यद्भोजनकालीनप्रागा
भावप्रतियोगिभोजनाधिकरणकालानंतरं वा गमनं तदनुकूलकृतिमानित्यन्वयः। स्थित्वा रथो गच्छतीत्यादावचेतने रप्रयोगश्छ[illegible]
विवाश्रयादौ लक्षणा तस्य चाश्रितत्वसंबंधेन क्रियायामन्वय इत्यक्तमेव। यत्तु क्त्वाप्रत्ययार्थकृतेरपि आश्रयतया कर्तर्येवान्व
यः। तथा च भोजनानुकूलकृतिमांश्चैत्रो भोजनकालीनप्रागभावप्रतियोगिगमनानुकूलकृतिमानित्यन्वयबोधः। तावतापि
समानकर्तृकत्वलाभादिति तन्न। भुक्त्वा व्रजतीत्यादौ समानकर्तृकत्वालाभापत्तेः। केचित्तु। चैत्रो भुक्त्वा व्रजतीत्यादौ व्रज
नप्रागभावकालीनव्रजनोत्पत्तिकालीनध्वंसप्रतियोगिकालनिष्ठं वा यद्भोजनं तत्समानकर्तृकव्रजनानुकूलकृतिमा
निति भोजनविशेष्यकोऽन्वयः। शक्तिर्लक्षणा च पूर्ववदेव। न च एकस्वार्थविशेषितापरपदार्थान्वितस्वार्थ[illegible]बो
धकत्वमव्ययत्वान्नामिति वाच्यम्। तादृशाव्ययत्वे मानाभावात्। अन्यथा स्वर्गकामो यजेतेत्यादौ इष्टसाधनीभूत[illegible]गानु
कूलकृतिमान् स्वर्गकाम इति प्रयोगत्त मुख्यविशेष्यक[illegible]न्वयबोधापत्तेः। घटो भविष्यति पटो नश्यति इत्यादावनागत

स्का॰

तत्वाश्रयो घटध्वंसानागतो यत्किंचिन्नाशप्रतियोगी घटइत्याद्यन्वयानुपपत्तिः तत्र प्रत्ययार्थयोरनागतत्वाश्रययोरनागतत्वा[illegible]
क्त्वप्रतियोगित्वयोश्च वा त्वं यमंतरा क्त्यैवान्वयादित्याहुस्तदसत् । संख्याकालादेरप्यसाधनताद्यतिरिक्त[illegible]
यविशेष्यतयैवान्वयइति व्युत्पत्तिभंगापत्तेः । न च क्त्वाप्रत्ययातिरिक्तस्य ल्यप एव तथा व्युत्पत्तिरिति[illegible]संकोचे
पपत्तौ संकोचस्यान्याय्यत्वादिति समासः इति क्त्वावादरहस्यम्

४